"वर्जयेत् मधुमांसञ्च भौमानि कवकानि च।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥")
श्लेष्मान्तकः, पुं, (श्लेष्मणा स्वसेवनजनितकफेन अन्तयति नाशयतीति। अन्त+णिच+ण्वुल।) वृक्षविशेषः। बहुयार इति वङ्गभाषा। लसोड़ा इति हिन्दी भाषा। तत्पर्य्यायः। बहुवारः २ पिच्छिलः ३ द्विजकुत्सितः ४ शेलुः ५ शीतफलः ६ शीतः ७ शाकटः ८ कर्व्वुदारकः ९ भूतद्रुमः १० गन्धपुष्पः ११। अस्य गुणाः। कटुत्वम्। हिमत्वम् मधुरत्वम्। कषायत्वम्। स्वादुत्वम्। पाचनत्वम् क्रमिशूलहरत्वम्। आमास्रदोषमलरोधबहुद्रणार्त्तिविस्फोटशान्तिकरत्वम्। कफकारकत्वञ्च। इति राजनिर्घण्टः॥ अस्यामफलगुणाः। विष्टम्भित्वम्। रूक्षत्वम्। पित्तकफास्रनाशित्वञ्च। तत्पक्वफलगुणाः। मधुरत्वम्। स्निग्धत्वम्। श्लेष्मत्वम्। शीतलत्वम्। गुरुत्वञ्च। इति भावप्रकाशः॥
श्लैष्मिकं, त्रि, (श्लेष्मणः शमनं कोपनं वा। श्लेष्मन्+"वातपित्तश्लेष्मभ्यः शमनकोपनयोः।" ५।१।३८। इत्यस्य वार्त्तिकोक्त्या ठञ्। कफशमनम्। कफकोपनम्। इति व्याकरणम्॥) श्लेष्मोद्भवम्। श्लेष्मसम्बन्धीयम्। इति श्लेष्मशब्दात् ष्णिकप्रत्ययेन निष्पन्नम्॥ (यथा, सुश्रुते। १। ३।
"चिकित्साप्रविभागीये वाताभिष्यन्दवारणः।
पैत्तिकस्य श्लैष्मिकस्य रौधिरस्य तथैव च॥")
श्लोक, ऋ ङ संघाते। वर्ज्जने। सर्ज्जने। इति कविकल्पद्रुमः॥(भ्वा०-आत्म०-अक०-सक०-च-सेट्।) संघात इह छन्दोविशिष्टवाक्यरचनम्। ऋ, अशुश्लोकत्। ङ, श्लोकते कविः। इति दुर्गादासः॥
श्लोकः, पुं, (श्लोक्यते इति। श्लोकसंघाते+घञ्।) पद्यम्। यशः। इत्यमरः॥ * ॥ (वाक्। इति निघण्टुः। १। ११॥ "शु श्रवणे 'इण् भीकापाशल्यतिमर्चिभ्यः कन्' इति कन्प्रत्ययो बाहुलकाद्भवति गुणः कपिलकादित्वाल्लत्वम्। श्रूयते इति श्लोकः। यद्वा श्लोक संघाते 'पुंसि संज्ञायां घः।' श्लोक्यते पद्यते रूपेण संहन्यते कविभिः श्लोकः।" इति तट्टीका॥) श्लोकनामकारणम्। यथा,—
"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥
तस्यैवं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः।
शोकार्त्तेनास्य शकुनेः किमिदं व्याहृतं मया॥
चिन्तयन् स महाप्राज्ञश्चकार मतिमान् मतिम्।
शिष्यञ्चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः।
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा॥"
इति रामायणे वाल्मीकीये बालकाण्डे २ सर्गः॥
श्लोण, ऋ सङ्घाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अशुश्लोणत्। संहातो सङ्गोकरणम्। इति दुर्गादासः॥

श्वः, [स्] व्य, अनागताहः। इत्यमरः॥ कालि इति भाषा॥ (यथा, रामायणे।२।६४।३६।
"श्वो मया सह गन्तासि जनन्या च समेधितः॥")
श्वःश्रेयसं, क्लौ, (श्वः आगामिकाले श्रेयो यत्र। "श्वसो वसीयःश्रेयसः।" ५।४।८०। इति अच्।) कल्याणम्। इत्यमरः॥ (यथा, भट्टिः। ४। ३८।
"श्वःश्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाणि सा॥")
परमात्मा। धर्म्मः। इति मेदिनी॥ कल्याणयुक्ते, त्रि॥
श्वक, इ ङ सर्पे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) वकारयुक्ताद्यः। इ, श्वङ्क्यते। ङ श्वङ्कते। सर्पो गतिः। इति दुर्गादासः॥
श्वगणः, पुं, (शुनां गणः।) कुक्कुरसमूहः। यथा।
"द्वारादेयवयोरिमुमौ स्यातां णित्तद्धिते परे।
श्वापदन्यङ्कोस्तु वा। न तु श्वगणप्रभृतीनाम्।
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। ८। १४।
"श्वगणा नात्र दृश्यन्ते पिशाचा मांसभोजनाः॥")
श्वच, ङ } गत्याम्। इति कविकल्पद्रुमः॥
श्वच, इ ङ } (भ्वा०-आत्म०-सक०-सेट्।) द्वौ वकारयुक्तादौ। पुनःपाठादाद्यो नेदनुबन्धः। ङितौ तु द्वौ। एक एवेत्पाठबलाद्बाध्य इति नियमात्। ङ, श्वचते। इ, श्वञ्चते। ङ, श्वञ्चते। इति दुर्गादासः॥
श्वठ, क } गतौ। असंस्कृते। संस्कृते। इति
श्वठ, इ क } कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) द्वौ वकारयुक्तौ पुनःपाठादाद्यो नेदनुबन्धः। त्रयः अर्थाः। क, श्वाठयति। इ क, श्वण्ठयति जनः। गच्छति किमपि संस्करोति वा इत्यर्थः। संस्कारगत्योरिति केचित्। इति दुर्गादासः॥
श्वठ, त् क दुर्व्वाचि। इति कविकल्पद्रुमः॥ (अदन्तचुरा०-पर०-सक०-सेट्।) वकारयुक्तः। श्वठयति नीचः। कुत्सितं वदतीत्यर्थः। रमानाथस्तु सम्यग्भाषणे इति मत्वा श्वठयति सम्यग्वदतीत्यर्थं इत्याह। सम्यग्भाग इत्यर्थे कं इति दुर्गादासः॥
श्वदंष्ट्रकः, पुं, (शुनो दंष्ट्रेव कण्टकोऽस्य।) गोक्षुरः। इति राजनिर्घण्टः॥
श्वदंष्ट्रा, स्त्री, (शुनो दंष्ट्रेव कण्टकावृतत्वात्।) गोक्षुरकः। इत्यमरः॥ (यथा, सुश्रुते।१।४६।
"पिप्पल्यादीनां श्वदंष्ट्रावसुकामवः कुष्माण्डादीनां दार्व्वीकरामवः॥")
श्वधूर्त्तः, पुं, (शुनि धूर्त्तस्तद्वञ्चकत्वात्।) शृगालः। इति शब्दरत्नावली॥
श्वनिशं, क्लौ, } (शुनां निशा। "सुरासेना-
श्वनिशा, स्त्री, } च्छायाशालानिशा स्त्रियाञ्च।" इति लिङ्गानुशासनसूत्रेण विभाषया क्लीवत्वम्।) शुनां निशा। इत्यमरभरती॥ मत्तकुक्कुरनिशा। यथा,—
"यस्यां मत्ता निशि श्वानः श्वनिशं श्वनिशा च सा॥"
इति जटाधरः॥
श्वपक् [च्]पुं, (श्वानं पचतीति। पच+क्विप्।) चण्डालः। यथा। निषादः। श्वपचः श्वपक्। इति भरतधृतवोपालितः॥ (यथा, मनुः।३।९२।
"शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम्।
वायसानां कृमीणाञ्च शनकैर्निर्व्वपेत् भुवि॥")
श्वपचः, पुं, (श्वानं पचतीति। पच+अच्।) चण्डालः। इत्यमरः॥ तस्य संज्ञा अन्त्यावसायी। तस्य धर्म्मो यथा,—
"चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः।
अपपात्राश्च कर्त्तव्या धनं येषां श्वगर्द्दभम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायः समलङ्कारः परिव्रज्या च नित्यशः॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥
अन्नं येषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः॥
बध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च॥*।
चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥"
तस्यान्नभक्षणे प्रायश्चित्तं यथा,—
"अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः।
स तु चान्द्रायणं कुर्य्यात् तप्तकृच्छ्रमथापि वा॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम्॥
श्वपाकः, पुं, (शुनां पाकः कार्य्यत्वेन यस्य।) चण्डालः। इत्यमरः॥ तस्योत्पत्तिर्यथा,—
"क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते॥"
इति मानवे १० अध्यायः॥*॥
रजस्वलायास्तस्य स्पर्शने प्रायश्चित्तं यथा,—
"चाण्डालेन श्वपाकेन संस्पृष्टा चेत् रजस्वला।
अतिक्रम्य तान्यहानि प्रायश्चित्तं समाचरेत्॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शुध्यति।
तां निशान्तु व्यतिक्रम्य स्वजात्युक्तन्तु कारयेत्॥"
इति वचनान्तरदर्शनात् एतत् कामतः। अज्ञाने बृहस्पतिः।
"पतिताल्यश्वपाकैस्तु संस्पृष्टा स्त्री रजस्वला।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥
प्रथमेऽह्नि त्रिरात्रन्तु द्वितीये द्व्यहमाचरेत्।
अहोरात्रं तृतीयेऽह्नि चतुर्थे नक्तमाचरेत्॥"
चतुर्थेऽह्नीति शुद्धिस्नानात् पूर्व्वम्। इति प्रायश्चित्ततत्त्वम्॥
श्वफलः, पुं, (श्वप्रियं फलमस्य।) बीजपुरः। इति रत्नमाला॥
श्वफल्कः, पुं, हृष्णिपुत्रः। स च अक्रूरपिता। यथा। अनमित्रस्यान्वयेऽन्या शाखाः। तस्मात् श्वफल्कः। तत्प्रभावः कथितस्तत्र। श्वफल्कस्यापि